सोपाधिसम्बद्धं तत्त्वेनानुपाधित्वसम्बद्धं सम्भवति न तु सत्प्रतिपक्षोच्छेदः पूर्वसाधनव्यतिरेकस्यानुपाधित्वे वीजं स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात् न च पूर्वहेतोस्तत एवासाधकत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम् अगृह्यमाणविशेषदशायां सत्प्रतिपक्षसम्भवात् । पूर्वसाधनव्याप्यव्यतिरेको यथा अकर्त्तृत्वानुमाने नित्यत्वादिः । पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम् । पक्षेतरसाध्याभावो यथात्रैव पर्वतेतराग्निमत्त्वं न चात्र व्यर्थविशेषणत्वं दूषणं सत्त्वेप्युपाधेराभासत्वात् । तत्तुल्यश्च यथात्रैव पर्वतेतरेन्धनवत्त्वम् । एवं वह्निसामग्र्यादिकमूह्यम्” विवरणं दीधित्यादौ द्रष्टव्यं विस्तरभयान्नोक्तम् । उपाधिना निर्मितः ठञ् स्त्रियां ङीप् । औपाधिक उपाधिजनिते मिथ्याभूते आरोपिते स्फटिकलौहित्यादौ जवासन्निकर्षात् स्फटिके च मिथ्याभूतं लौहित्यमुत्पद्यते इति वेदान्तिनः । नैयायिकादयस्तु तत्र लौहित्यस्य भ्रान्तिरित्युररीचक्रुः । प्रमेयवि०संग्रहे तयोः पक्षयोर्युक्तायुक्तत्वं यथावसितं तदत्र दर्श्यते ।

“यस्तु लौहित्यमिथ्यात्वं न सहते स वक्तव्यः किं स्फटिकप्रवृत्ता नयनरश्मयः स्फटिकप्रतिफलितजवाकुसुमसुपसर्पेयुः ? किं वा कुसुमगतरूपमात्रं स्फटिके प्रतिविम्बितं स्फटिकात्मना भासते ? उत पद्मरागादिमणीप्रभयेव कुसुमप्रभया व्याप्तत्वात् स्फटिको लोहितइवावभासते ? । अथ वा तत्र व्याप्नुवती प्रभैव लोहिता भाति ? आहोस्वित्तया प्रभया स्फटिके नूतनं लौहित्यमुत्पादितम् ! आद्ये नेत्राभिमुखं कुसुममपि प्रतीयेत । यदि च दोषवशान्न कुसुमेन संयोगः तर्हि लौहित्यमपि न भासेत तद्युक्तसमवायस्य तत्राभावात् । न द्वितीयः क्वचिदपि द्रव्यं परित्यज्य रूपमात्रस्य प्रतिविम्बादर्शनात् । तृतीये तु स्फटिकलौहित्ययोः सम्बन्धो मिथ्येति त्वयाभ्युपगतमेव स्यात् इवशब्दप्रयोगात् । चतुर्थे स्फटिकशौक्ल्यमपि प्रतीयेत अप्रतीतिकारणाभावात् न च जवाप्रभया विरोधिगुणयुक्तया शौक्ल्यमपसारितं तत्रासति नीरूपस्य स्फटिकस्याचाक्षुषत्वप्रसङ्गात् न हि रूपं विहाय द्रव्यमात्रस्य चाक्षुषत्वं सम्भवति वायोरपि तत्प्रसङ्गात् । पञ्चमेऽपि प्रभा निमित्तकारणं चेत्तदा प्रभापगमेऽपि स्फटिके लौहित्यमवतिष्ठेत् । उपादानं प्रभेति चेत् न मणाविव कुसुमे प्रभाया एवादर्शनात् पूर्वोक्तविकल्पदूषणानामङ्गीकारवादत्वात् तदेवं स्फटिके मिथ्या लौहित्यं कुसुमनिमित्तमित्यङ्गीकर्त्तव्यम् । एवमात्मन्यहङ्कारनिमित्तं कर्त्तृत्वादिकमारोप्यते” । प्रतिविम्बपक्षेऽपि प्रतिम्बपदार्थस्य यथा मिथ्यात्वं तदपि तत्रैव निर्णीतं यथा ननु जीवस्याहङ्कारस्यप्रतिविम्बत्वे दर्पणस्थमुखप्रतिविम्बवद्विम्बाद्भेदः स्यात् । तत्र हि ग्रीवास्थदर्पणस्थयोरन्योन्याभिमुखत्वेन भेदोऽनुभूयते । नैवं मदीयमिदं मुखमित्यैक्यप्रत्यभिज्ञयाभेदानुभवस्य बाधात् । न च प्रत्यभिज्ञैवेतरेण बाध्येति वाच्यम् सति भेदे प्रतिविम्बासम्भवात् । किं प्रतिविम्बो नाम मुखलाञ्छितमुद्रा उत दर्पणावयवा एव विम्बस्य सन्निधिवशात्तथा परिणमन्ते । नाद्यः दर्पणस्थमुखस्येतरस्मादल्पत्वात् । यत्र तु प्रौढदर्पणे प्रौढं मुखमुपलभ्यते तत्रापि तस्य न मुद्रात्वम् दर्पणमुखयोः संयोगाभावात् । न द्वितीयः निमित्तकारणस्य विम्बस्यापायेऽपि तस्यावस्थानप्रसङ्गात् न हि तथावतिष्ठते । तेनैव पुरुषेण दर्पणे तिर्य्यङ्निरीक्षिते पुरुषान्तरेण सम्यगवलोकिते वा तन्मुखानुपलम्भात् । न चैवं मन्तव्यम् क्वचिन्निमित्तापाये कार्यमप्यपैति हस्तसंयोगजन्यस्य कटप्रसारणस्य हस्तसंयोगापायेऽपायदर्शनादिति । न तत्र निमित्तापायात् कार्यापायः किन्तु चिरकालसंवेष्टनाहितेन संस्कारेण संवेष्टनलक्षणविरुद्धकार्योत्पादनात् । अन्यथा चिरकालप्रसारणेन संवेष्टनसंस्कारे विनाशितेऽपि हस्तापाये प्रसारणमपेयात् । न चैवमपैति । इह तु चिरकालविम्बसन्निधावप्यन्ते विम्बापाये प्रतिविम्बोऽपि गच्छत्येवेति न विम्बं परिणामस्य निमित्तम् । अथ मन्यसे चिरकालावस्थितोऽपि कमलविकाशः सवितृकिरणस्य निमित्तस्यापायेऽपगच्छतीति । तन्न तत्रापि प्राथमिकमुकुलत्वे हेतुभिः पार्थिवैराप्यैश्च कमलावयवैः पुनरपि रात्रौ मुकुलत्वे विरुद्धकार्ये जनिते विकासापायात् । अन्यथा तादृगवयवरहिते म्लाने कमलेऽपि रात्रौ विकासोऽपगच्छेत् । आदर्शे तु मुखाकारपरिणते पुनः केन हेतुना समतलाकारपरिणामः तदवयवानां कारुकमव्यतिरेकेण अकिञ्चित्करत्वात् । अतएव विम्बासन्निधिमात्रेण नादर्शावयवा मुखाकारेण परिणमेरन् । अन्यथा दर्पणद्रव्ये प्रतिमामुखे कर्त्तव्ये सति लौकिका विम्बमेव सन्निधापयेयुर्नतद्धेतुमपक्षेरन् । दर्पणद्रव्यस्यान्याकारपरिणामे कारुकर्मापेक्षायामपि प्रतिविम्बपरिणामे पुनः स्वरूपपरिणामे वा न तदपेक्षेति चेत् एवमपि न मुख-